Lokadarpana
Vol. VI, No. 1, 83-98, April, 2026
Pandit Shree Lokanath Luitel Smriti Pratishthan, Dharan

# प्रतिमानाटके छन्दःप्रयोगः

**डा. रत्नावलीशर्मा***

ratna.nsu@gmail.com

Received Date: February 15, 2026 - Accepted Date: March 28, 2026

**शोधसारः**

भासनाटकचक्रे स्वप्नवासवदत्तनाटकादनन्तरं प्रतिमानाटकस्य द्वितीयं महत्त्वपूर्णं स्थानं वर्तते। यद्यपि छन्दांसि काव्यत्वप्रयोजकानि न मन्यन्ते तथापि संस्कृतसाहित्ये न केवलं महाकाव्यकाव्यखण्डकाव्येष्वेव प्रत्युत रूपकेषु चम्पूष्वपि छन्दसां प्रयोगो दृश्यते। महाकविना भासेन प्रतिमानाटके पञ्चदशसङ्ख्यातानां छन्दसां प्रयोगो विहितोऽस्ति। तेषु त्रयोदशसङ्ख्यातानि समवृत्तानि एकं विषमवृत्तम् एकञ्च मात्राम च्छन्दो वर्तते। छन्दसां क्रमे प्रथमम् वर्णछन्दसु समवृत्तस्य, अक्षरसंख्यानुसारेण अष्टाक्षरात्मकं समवृत्तम् अनुष्टुभमारभ्य एकविंशत्यक्षरात्मकं स्रग्धरावृत्तं यावत् अक्षरवृद्ध्यनुक्रमेण छन्दांसि न्यस्तानि सन्ति। तत अर्धसमवृत्तस्य ततश्च मात्राच्छन्दसो विश्लेषणं विहितमस्ति। यत्र सर्वाधिकम् सप्तसप्ततिसङ्ख्यातेषु पद्येषु अनुष्टुब्छन्दसः प्रयोगोऽस्ति, सर्वतो न्यूनञ्च समवृत्तेषु वर्णच्छन्दस्सु स्रग्धरामालिन्योरेकैकः प्रयोगो विद्यते। समग्रतया विवेचने महाकविना भासेन प्रतिमानाटके पञ्चदशभिः छन्दोभिः त्रिपञ्चाशदुत्तरैकशत-पद्यानि प्रणीतानि सन्ति। परवर्तिभिः क्षेमेन्द्रादिभिः कैश्चिदाचार्यैर्यद्यपि विषयविशेषेषु रसविशेषेषु च छन्दसां विनियोगो विहितो दृश्यते तथापि विनियोगोऽयमपरिहार्यो नास्ति। क्षेमेन्द्रकृतस्य सुवृत्ततिलकस्य विषय-सम्बद्धस्य रससम्बद्धस्य च विनियोगस्याधारेण प्रतिमानाटके प्रयुक्तानां छन्दसां विश्लेषणस्य विवेचनायां अनुष्टुभः, उपजातेश्च प्रयोगः विषयगतां स्पष्टतां रसगतां च मनोज्ञतां सम्पादयति। किञ्च नीतिवर्णनप्रसङ्गे वंशस्थछन्दसः, रथवेगस्य सीम्नो वर्णने शिखरिण्या प्रयोगोऽपि विषयगतं विनियोगं चारुतया प्रस्तौति। सामान्यतया छन्दसां विश्लेषणे निगमनरीत्या विश्लेषणं विहितमस्ति।

---

* उपप्राध्यापकः, सहित्यविभागः, वाल्मीकिविद्यापीठम्, काठमाडौँ।

एष विनियोगो परवर्तिभिः क्षेमेन्द्रादिभिर्भासकालिदासादीनां महतां कवीनां कृतीरेवावलोक्य विहित इति विनियोगशास्त्रानुसारेण प्रतिमायां प्रयोगो न विद्यते परं प्रतिमादीन् ग्रन्थान् विलोक्यैव साहित्याचार्यैः छन्दसां विनियोगो विहित इति स्वीकर्तुं शक्यते। समग्रतया विश्लेषणे संगीतमय्या मधुरतया प्रतिमानाटकस्य वृत्तप्रयोगः समीचीनो दृश्यते। तत्रापि स्थाने स्थाने विषयविशेषस्य रसविशेषस्य च विनियोगानुगमनेन प्रतिमानाटकस्य छन्दसा योगः पाठकानां कृते हृदयावर्जकः कविनाञ्च कृते अनुसरणीयः संवृत्तोऽस्ति।

**शब्दकुञ्जी :** उपजातिः, विनियोगः, प्रतिमा, रूपकम्।

## विषयपरिचयः

संस्कृतवाङ्मये छन्दसामधिकं महत्त्वं विद्यते। छन्दःशिक्षाकल्पव्याकरणज्यौतिषनिरुक्ताख्येषु षट्सु वेदाङ्गेषु छन्दो वेदानाम् आधारभूमितया प्रथमतया स्मृतं दृश्यते। वेदेषु छन्दसां प्राबल्यादेव छन्दःशब्दः श्रुतीनां पर्यायत्वेनापि प्रयुक्तो दृश्यते। न केवलं संहितासु प्रत्युतो ब्राह्मणेषु, आरण्यकेषु, उपनिषत्सु च छन्दसां प्रयोगः प्रचुरतया जातोऽस्ति। लौकिकवाङ्मयेऽपि विविधेषु शास्त्रेषु, दर्शनेषु, पुराणेषु, साहित्येषु च छन्दांसि प्रयुक्तानि दृश्यन्ते। साहित्ये हि न केवलं काव्येषु प्रत्युत रूपकेष्वपि छन्दांसि प्रचुरतया प्रयुक्तानि सन्ति।

संस्कृतवाङ्मये छन्दसामतीव महत्त्वपूर्णं स्थानं विद्यते। छन्दसां प्राचुर्यदिव वेदाः छन्दःशब्देनापि व्यवह्रियन्ते। न केवलं वैदिक्यः संहिता प्रत्युत उपनिषत्सु ब्राह्मणेषु आरण्यकेषु प्रतिशाख्यादिषु च सर्वत्रैव छन्दसामुपयोगो विद्यते। लौकिके वाङ्मयेऽपि सर्वत्र छन्दसां प्राचुर्यं वरिवर्ति। न केवलं पुराणानि प्रत्युत निखिलान्यपि शास्त्राणि छन्दोमयानि दृश्यन्ते। किं बहुना दार्शनिका जटिलतरा ग्रन्था अपि छन्दसां माध्यमेन सहजतया बोधगम्यतया च प्रतिपादिता दृश्यन्ते। साहित्येऽपि न केवलं महाकाव्यानि काव्यानि खण्डकाव्यान्येव छन्दोबद्धानि सन्ति प्रत्युत चम्पूषु रूपकेष्वपि छन्दोमय्या वाण्या एव प्राचुर्यं दरीदृश्यते, संस्कृतरूपन काणां संवादाः प्रायो गद्यपद्यमया विद्यन्ते। यद्यपि संस्कृतरूपकेषु गद्यानां पद्यानाम् इयत्तायाः कोऽपि नियमो नास्ति तथापि प्राचीनादेव कालाद् रूपकस्य नाटकादिषु सर्वेष्वपि प्रकारेषु बहुधा छन्दांसि प्रयुक्तानि सन्ति।

संस्कृतनाट्यसाहित्ये हि समुपलब्धायाः साहित्यसामग्र्या आधारे भासः प्रथमो नाटककारो मन्यते, यस्य समयः ख्रिस्तात् ४०० –५०० वर्षाणि पूर्वं मन्यते। अस्य हि

दूतवाक्यम्, कर्णभारम्, दूतघटोत्कचम्, उरुभङ्गम्, मध्यमव्यायोगः, पञ्चरात्रम्, बालचरितम्, प्रत तिमानाटकम्, अभिषेकनाटकम्, अविमारकम्, प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, चारुदत्तञ्चेति त्रयोदशरूपकाणि प्रणीतानि सन्ति।

एतेषु प्रतिमानाटकं सप्ताङ्कं रामकथामाधृत्य प्रणीतं मनोरमं नाटकं विद्यते। अस्मिन् नाटके प्रचुरतया छन्दसां प्रयोगो दृश्यते। छन्दःशास्त्रदृष्ट्या प्रतिमानाटके प्रयुक्तानां पद्यानां विश्लेषणमस्मिन् प्रतिमानाटके प्रयुक्तानि छन्दांसि इति शीर्षके शोधलेखे विहितमस्ति।

रूपकेषु छन्दोबद्धानां वाक्यानामपरिहर्यत्वाभावेऽपि प्रायो नाटककारा नाटकेषु छन्दसां प्रयोगं विदधाना दृश्यन्ते। तदत्र छन्दःशास्त्रानुसारेण प्रतिमानाटकस्य पद्यानां विवेचनं मुख्या समस्या विद्यते। या हि छन्दः-

शशास्त्रस्य नियमानुसारेण प्रतिमानाटके प्रयुक्तानां छन्दसां कीदृशी स्थितिरिति शोधप्रश्नेनोपस्थापितो विद्यते। यद्यपि काव्यत्वाय छन्दसां प्रयोगोऽपरिहार्यो न मन्यते तथापि संस्कृतवाङ्मये छन्दसां प्रयोगः प्रचुरतया सञ्जातोऽस्ति। तत्रापि संस्कृते महाकाव्येषु काव्येषु वैदिकेषु लौकिकेषु छन्दःशास्त्रेषु पर्याप्ततया छन्दसां तेषां लक्षणोदाहारणस्य विश्लेषणे विद्यमानेऽपि यथा रसालङ्कारगुणरीतिध्वनिवक्रोक्त्यौचित्यानां तत्त्वानां काव्येषु प्रयोगस्य विश्लेषणं दृश्यते तथा पर्याप्ततया काव्येषु छन्दोविधानस्य प्रचुरतयाऽध्ययनं जातं न दृश्यते। छन्दसां काव्यगतरूपेण प्रयोगेऽपि गुणदोषाणां निरूपणमपरिहार्यतयैव कर्तव्यं भवति। प्राचीना हि प्रथिताः कवयः कालिदासः मन्दाक्रान्तायाः (सुवृत्ततिलकम्, ३।३४), भवभूतिः शिखरिण्याः (सुवृत्ततिलकम्, ३।३३), भारविर्वंशस्थस्य (सुवृत्ततिलकम्, ३।३१), रत्नाकरश्च वसन्ततिलकायाः प्रयोगेण विशेषां प्रथितिं लब्धवन्तः। एवं सामान्यतया छन्दःशास्त्रेषु सलक्षणसमन्वयं प्रातिस्विकं काव्यगततया विश्लेषणं तु पर्याप्ततया लभ्यते परन्तु काव्यनाटकादिषु ग्रन्थेष्वेव टीकायां क्वचित् क्वचिद् अस्मिन् पद्ये इदं छन्दरिति सामान्यायाः सूचनाया अतिरिक्तं लक्षणगतं विषयगतं रसगतं वा विश्लेषणं प्रायो न विद्यते। भासकृतस्य प्रतिमानाटकस्य टीकाग्रन्थेषु छन्दसां प्रयोगस्य सामान्या सूचनैव लभ्यते। छन्दो विधानदृशा तत्रत्यानां पद्यानां विषयसम्बद्धं रससम्बद्धं छन्दःप्रयोगसम्बद्धञ्च विश्लेषणमावश्यकमस्तीति शोधान्तरालमिदं प्रपूरयितुं लेखोऽयमौचितीमुपयोगिताञ्च बिभर्ति।

किञ्च लेखोऽयं निगमनप्रणाल्याः पाठविश्लेषणविधिना विषयवस्तुनो निरूपणेन सहैव श्लोकाङ्काः दत्ता सन्ति। आधुनिकानां ग्रन्थानां च साक्ष्यप्रस्तुतौ बएब् लेखकपृष्ठसरणिर्गृहीतास्ति। प्रतिमानाटकगतानां छन्दसामध्ययनप्रसङ्गे सामान्यतया प्रतिमानाटकं समीक्ष्यग्रन्थत्वेन सैद्धान्तिकाधारो निर्माणे च क्षेमेन्द्रस्य सुवृत्ततिलकस्य केदारभट्टस्य वृत्तरत्नाकरग्रन्थस्य सीमा निर्धारितास्ति।

छन्दःशास्त्रस्य नियमानुसारेण प्रतिमानाटके प्रयुक्तानां छन्दसां निरूपणमस्य शोधलेखस्य प्रमुखमुद्देश्यं वर्तते। प्रतिमानाटके प्रयुक्तानां छन्दसां सामग्र्येण विनियोगदृशा चाध्ययनं न जातमित्येतदन्तरालं प्रपूरयितुं शोधलेखस्यास्यौचित्यं महत्त्वञ्च स्थिरीभवति।

## अध्ययनविधिः

गुणात्मके शोधलेखेऽस्मिन् साक्ष्याणां सूचना परम्परितया रीत्या मूलपाठे कोष्ठगर्भे प्रकरणादीनामुल्लेखं विधाय विन्यस्तास्ति। निगमनपद्धत्या लक्ष्ये छन्दसां निरूपणेन सहैव पाठविश्लेषणविधिना शोधलेखोऽयं प्रतिपादितोऽस्ति। सन्दर्भग्रन्थसूची तु लेखकमिति (बएब्) शैल्या निर्मितास्ति।

संस्कृतच्छन्दःशशास्त्रं विशेषतः केदारभट्टप्रणीतस्य वृत्तरत्नाकरस्य क्षेमेन्द्रप्रणीतस्य सुवृत्ततिलकस्य च सैद्धान्तिकमाधारं गृहीत्वा संस्कृतरूपकेषु भासप्रणीतस्य प्रतिमानाटकस्य छन्दसां विश्लेषणमस्य शोधलेखस्य सीमा वर्तते। भासप्रणीतेषु रूपकेषु प्रतिमानाटके प्रयुक्तानामेव छन्दसां विश्लेषणमत्र विधीयते।

## सैद्धान्तिकाधारः

चन्दते आह्लाद्यते इति व्युत्पत्या 'चदि आह्लादे' इति धातो पाणिनीयव्याकरणस्य 'चन्देरादेश्च छ' इति धातोः (उणादि ४।२१८) इति नियमानुसारेण असुन् प्रत्यये धातोराद्यक्षरस्य चस्य छत्वे च छन्दःशब्दो

निष्पद्यते। छन्दांसि हि वाक्यं श्रुतिमधुरं गेयञ्च सम्पाद्य पाठकमनांसि समाह्लादयन्ति परन्त्वाचार्येण यास्केन निरुक्ते 'छन्दांसि छादनाद्' इति निर्वचनेन 'छदि संवरणे' इति धातो च्छन्दःशब्दस्य निष्पत्तेः सङ्केतो दत्तः (निरुक्तम् ७।३।१२)। छन्दांसि हि वर्णविन्यासविशेषेण मात्राविन्यासविशेषेण च श्रवणमाधुरीमापाद्य श्रोतृणां पाठकानां वा हृदये मस्तिष्के च सुस्थिरं धारणक्षमं च सम्पादयन्ति।

समस्तेऽपि संस्कृतवाङ्मये छन्दसाम् अतीव महत्त्वं विद्यते। छन्दसां प्राचुर्यदेव 'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव (रघुवंश, १।११।)। 'छन्दसि च' (अष्टाध्यायी, ५।१।६७।) एषु पञ्चमो लकारश्छन्दो मात्र गोचरः (सिद्धान्तकौमुदी तृतीयो खण्डः पृ.४) इत्यादिषु वेदाच्छन्दःशब्देनाभिधीयन्ते। न केवलं वैदिकीषु संहितासु प्रत्युत ब्राह्मणेष्वारण्यकेषूपनिषत्सु सर्वत्रैव छन्दसां प्रचुरता दरीदृश्यते। लौकिके संस्कृतवाङ्मयेऽपि पुराणेषु दर्शनेषु साहित्येषु विविधेषु शास्त्रेषु च छन्दसामेव साम्राज्यं वरिवर्ति। साहित्ये हि चम्पूष्विव रूपकेष्वपि गद्यानां पद्यानाञ्च प्रयोगो विद्यते। समस्तेष्वपि रूपकेषूपरूपकेषु च पद्यमया संवादा बाहुल्येन दृश्यन्ते। परमाधुनिकैः कतिपयैर्नाट्यशास्त्रिभिः सर्वविधेष्वपि रूपकेषूपरूपकेषु च कविपात्राण्युद्धरणानि विहाय छन्दोमय्या भाषायाः प्रयोगो निषिध्यते। कविव्यतिरिक्तैः पात्रैश्छन्दोमय्या भाषायाः प्रयोगस्यास्वाभाविकत्वात् दर्शकेषु घटनाः प्रति विश्वसनीयता प्रभावकारिता च हीयते (अभिनवनाट्यशास्त्रम्, पृ.४९६)।

नेपालेऽपि तदनुसरणं विदधद्भिः चूडानाथभट्टरायप्रभृतिभिर्नाटककारैश्छन्दः प्रयोगशून्यानि परिणामादीनि संस्कृतनाटकानि प्रणीतानि। परं प्राचीनादेव कालात् संस्कृते छन्दोमयाः संवादाः प्राचुर्येण दृश्यन्ते। भासकालिदासभवभूतिभट्टनारायणप्रभृतीनां नाटककाराणां रूपकेषु पद्यमयाः संवादा गद्यसंवादापेक्षया आधिक्येनैव दृक्पथमवतरन्ति। नाट्याचार्यो महामुनिर्भरतस्तु छन्दसां व्यापकतां स्वीकुर्वाणश्छन्दो विना शब्दस्य शब्दं विना च छन्दसः स्थितिमेव न स्वीकुरुते। छन्दःशब्दौ हि संपृक्तावेव नाट्यं प्रकाशयत इति स नाट्ये शब्दानामिव छन्दसामपि स्थितिमपरिहार्यां मनुते –

छन्दो हीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।
तयोस्तूभयसंयोगो नाट्यस्योद्योतकः स्मृतः ॥ (सं. मधुसूदनशास्त्री, ना.शा. १४।४७)

छन्दःशास्त्रिणा केदारभट्टेनापि छन्दःशास्त्रनिरूपितैः म य र स त ज भ नरूपैरष्टभिर्गणैः गुरुवाचकेन गकारेण लघुवाचकेन लकारेण चेति दशभिरक्षरैः परमात्मना विष्णुना एव निखिलमपि वाङ्मयं व्याप्तमस्तीति छन्दसां वाङ्मये व्यापकता निर्दिष्टा।

म्यरस्तजम्नगैर्लान्तैरेभिदशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ (वृत्तरत्नाकरम्, १।६)

लौकिकानि हि छन्दांसि मात्राच्छन्दस्त्वेन वर्णच्छन्दस्त्वेन च द्विधा विभक्तानि सन्ति। वर्णच्छन्दस्तु वृत्तनाम्नाऽभिधीयते। तत्र मात्राच्छन्दो जातिनाम्नापि व्यवहृतो दृश्यते। वर्णच्छन्दसु त्रिवर्णात्मका अष्टौ गणा निर्दिष्टाः सन्ति। तत्र सर्वगुरुर्मगणः( ऽऽऽ) आदिलघुर्यगणः (। ऽऽ), अन्त्यगुरु सगणः(।। ऽ), अन्त्यलघुस्तगणः (ऽऽ। ), मध्यगुरुर्जगणः(। ऽ। ), आदिगुरुर्भगणः ( ऽ।। ), सर्वलघुनगणश्च (।।।) भवति। (वृत्तरत्नाकरम्, १।७,१।८)

मात्राच्छदस्सु तु चतुर्मात्रायुक्ताः पञ्चगणा भवन्ति। तत्र सर्वगुरुर्मगणः (ऽऽऽ) मध्यगुरुर्जगणः (।ऽ।), अन्त्यगुरुः सगणः (।। ऽ) , आदिगुरुर्भगणः (ऽ।। ) सर्वलघु (।।।) नगणश्चेति पञ्चैव गणाः सम्भवन्ति। मात्राधिक्याद् यगण–रगण–तगणानां स्थितिस्तत्र न सम्भवति। छन्दःशास्त्रे हि वर्णच्छन्दसु अष्टौ गणान् मात्राच्छन्दसु पञ्चगणान् आधृत्य लाघवार्थं प्रवृत्तिर्दृश्यते। वस्तुतस्तु सर्वमपि वाङ्मयं गुरुलघुभ्यां द्वाभ्यामेव वर्णाभ्यां व्यापृतं विद्यते। वर्णच्छन्दांसि हि त्रिविधानि सन्ति– समवृत्तम्, अर्धसमवृत्तं विषमवृत्तञ्चेति। समवृत्ते हि चत्वार्येव चरणानि समानलक्षणानि भवन्ति। अर्धसमवृत्तं प्रथमतृतीययोरेकं द्वितीयचतुर्थपादयोश्च ततोभिन्नं किन्तु समानं लक्षणं भवति। विषमे वृत्ते तु चतुर्ण्णामेव पादानां भिन्नानि भिन्नानि लक्षणानि भवन्ति (वृत्तरत्नाकरम्, १।१४–१६)। प्रायः कवयो हि समवृत्तेषु रुचिवन्तो दृश्यन्ते।

## प्रतिमागतानां छन्दसां विश्लेषणम्

यद्यपि भासात् पूर्वमप्यनेकानि रूपकाणि व्यरच्यन्त तथापि तेषां नाम्नामुल्लेख एव समुपलभ्यते। समुपलब्धकृतिषु कविषु महाकविर्भास एव प्रथमो नाटककारो विद्यते। अस्य हि त्रयोदशसु रूपकेषु स्वप्नवासवदत्तनाटकादनन्तरं प्रतिमानाटकमन्यतमं विद्यते। समुपलब्धनाट्यवाङ्मये भासस्य नाटकानि एव प्राचीनानि मन्यन्ते। संस्कृतरूपकपरम्परानुसारेणैव भासस्य प्रतिमानाटके गद्यसंवादेन सहैव पद्यसंवादानामपि प्राचुर्यं विद्यते।

सप्ताङ्केऽस्मिन् नाटके महाकविना भासेनाधोनिर्दिष्टानि छन्दांसि प्रयुक्तानि विद्यन्ते –

अनुष्टुभ्, इन्द्रवज्रा, उपजातिः, शालिनी, वंशस्थम्, प्रहर्षिणी, वसन्ततिलका, मालिनी, शिखरिणी, हरिणी, शार्दूलविक्रीडितम्, सुवदना, स्रग्धरा, पुष्पिताग्रा, आर्या इत्येतानि पञ्चदश वर्णमात्राच्छन्दांसि प्रयुक्तानि सन्ति।

### अनुष्टुभ्

अनुष्टुभो गणना मात्राच्छन्दसु वर्णच्छन्दसु चोभयत्रापि समुपलभ्यते। तत्र हि वर्णच्छन्दःस्विव वर्णानां परिगणनया स्वरूपं निर्धार्यते इति वर्णच्छन्दस्सु अनुष्टुभः परिगणना भवति। किञ्च अन्येषां वर्णच्छन्दसामेव वर्णा गुरुलघूनां नियततया स्थितिर्नभवतीति मात्राच्छन्दष्वपि तस्य परिगणना जाता दृश्यते। केदारभट्टेन हि मात्राप्रकरणे वक्त्रापवक्त्रविपरीतपथ्यावक्त्रादीनां छन्दसाम् अनुष्टुप्प्रकरणे विवेचनं विहितं दृश्यते –

वक्त्रं नाद्यान्नसो स्यातामब्धेर्योऽनुष्टुभि ख्यातम् (वृत्तरत्नाकरम्, २।२१)। तेन हि वर्णच्छन्दष्वपि अनुष्टुभ्जाति पृथक्तया निर्दिष्टा। यत्र चित्रपदाविद्युन्मालामाडवकसमानिकाप्रमाणिकादीनि छन्दांसि निरूपितानि परम् अनुष्टुभः प्रचलितं स्वरूपं तेन द्वयोरपि प्रकरणयोर्न निर्दिष्टम्। अनुष्टुभ् नाम्ना ख्यातं संस्कृतवाङ्मये आधिक्येन प्रयुक्तमिदं छन्दः श्लोकनाम्ना प्रसिद्धमस्ति। यस्य स्वरूपं क्षेमेन्द्रेण अधोनिर्दिष्टया रीत्या प्रस्तुतम् –

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ (सुवृत्ततिलकम्, १।१४)

अस्यायम् अर्थो यत् प्रस्ताररचनया मात्राच्छन्दःसु अनुष्टुभ् प्रकरणे वर्णच्छन्दःसु अनुष्टुभ्जातौ निरूपिते

श्लोकनाम्ना प्रथिते वृत्तेऽस्मिन् चतुर्ष्वेव चरणेषु पञ्चमो वर्णो लघुः षष्ठवर्णो गुरुः प्रथमपादे तृतीयपादे च सप्तमो वर्णो गुरुर्द्वितीये पादे चतुर्थपादे च सप्तमो वर्णो लघुर्भवति। अष्टवर्णात्मके वृत्तेऽस्मिन् अन्येषां पञ्चवर्णानां गुरुत्वस्य लघुत्वस्य च स्वरूपं नियतं नास्ति। इदं हि वृत्तच्छन्दः शास्त्रे पद्यनाम्नापि स्मृतं दृश्यते –

पञ्चमं लघुः सर्वत्र सप्तमं द्विचतुर्थयोः।
षष्ठं गुरु विजानियादेतद् पद्यस्य लक्षणम् ॥ (श्रुतबोध, १०)

प्रतिमानाटके हि सर्वाधिकम् अनुष्टुब्छन्दसः प्रयोगो दृश्यते। तत्र द्वापञ्चाशदधिकैकशतसङ्ख्यातेषु पद्येषु आसन्नार्धषु षट्सप्ततिपद्येषु अनुष्टुभः प्रयोगो दृश्यते।

प्रतिमानाटके प्रयुक्तानां छन्दसां विवरणम् अस्य शोधलेखस्यान्ते तालिकायां प्रस्तुतमस्ति।

दिग्दर्शनार्थमत्र लक्षणानुगमः प्रदर्श्यते

तपः सङ्ग्रामकवचं नियमद्विरदाङ्कुशः।
खलीनमिन्द्रियाश्वानां गृह्यतां धर्मसारथिः ॥(प्रतिमानाटकम्, १।२८)

अत्र हि चतुर्ष्वेव चरणेषु पञ्चमो वर्णो लघुः षष्ठश्च गुरु विद्यते। एवमेव प्रथमतृतीयचरणयोः सप्तमो वर्णो गुरु द्वितीयचतुर्थचरणयोस्तु सप्तमो वर्णो लघुरस्ति। एतान् त्रीन् वर्णान् विहायान्येषु पञ्चसु वर्णेषु कोऽपि नियमो नास्ति। कवि कामाचारतया गुरु लघु वा वर्णं सन्निवेष्टुम् शक्नोतीति पद्यापरनामकं श्लोकवृत्तं वर्तते। एवमेवोपरि निर्दिष्टेषु अन्येषु सप्तसप्ततिसंख्यातेषु पद्येष्वपि एतस्य लक्षणस्यानुगमः स्फुटतया परिलक्ष्यते। एवमेव नाटकस्यान्ते भरतवाक्ये – तथारमश्च जानक्या बन्धुभिश्च समागतः। तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः।( प्रतिमानाटकम्, ७।१५)। अत्रापि चतुर्ष्वेव चरणेषु पञ्चमो वर्णो लघुः षष्ठो गुरुः प्रथमतृतीयचरणयोः सप्तमो गुरुर्द्वितीयचतुर्थयोस्तु सप्तमो लघुर्वर्तते। अत एवात्र अनुष्टुभः विशेषरूपं श्लोकवृत्तं विद्यते।

प्रतिमानाटके हि न केवलं सङ्ख्यादृशा गुणदृशाऽपि श्लोकाख्यस्यानुष्टुभ् वृत्तस्याधिक्येनोत्कर्षो दृश्यते।

**इन्द्रवज्रा**

एकादशाक्षरात्मके त्रिष्टुभ्जातीये इन्द्रवज्राख्ये समवृत्ते प्रत्येकं चरणेषु तगणद्वयं, जगणः, द्वौ गुरू वर्णौ च भवन्ति। स्यादिन्द्रवज्रा यदि गौ जगौ ग (वृत्तरत्नाकरम् ३।३०)

इदं हि वृत्तं प्रतिमानाटकस्य केवलं त्रिषु एव पद्येष्वनुगतं विद्यते। दिङ्मात्रमत्रोदाह्रियते –

स्वैरं हि पश्यन्तु कलत्रमेतद्
ऽऽ। ऽऽ। ।ऽ। ऽऽ
वाष्पाकुलाक्षैर्वदनैर्भवन्तः।
ऽऽ। ऽऽ। ।ऽ। ऽऽ
निर्दोषदृश्या हि भवन्ति नार्यो
ऽऽ। ऽऽ। ।ऽ। ऽऽ

यज्ञे विवाहे व्यसने वने च ॥ (प्रतिमानाटकम्, १।२९।)

ऽ ऽ। ऽ ऽ। ।ऽ।ऽ ऽ

अत्र हि प्रत्येकं चरणेषु प्रथमं द्वौ तगणौ जगण ततश्च द्वौ गुरू च विद्येत इतीन्द्रवज्रानामकं समवृत्तं वर्तते।

**उपजातिः**

सामान्यतया सजातीययोः छन्दशास्त्रेषु निरन्तरं प्रतिपादितयोद्र्वयोः छन्दसो चरणसाङ्कर्येण उपजातिछन्दः सम्पद्यते।

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्याष्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥ (वृत्तरत्नाकरम्, ३।३२)

एतच्चरणसाङ्कर्यं हि बहुधा सम्पद्यते। चरणसाङ्कर्यदिव उपजातेः चतुर्दशभेदाः सञ्जायन्ते।

एकत्र पादे चरणे द्वये वा पादत्रये वान्यतरः स्थितश्चेद्।
तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥ ( वृत्तरत्नाकरस्य प्राज्ञतोषिणीटिकायाम्)

अस्य हि चतुर्दशभेदानां पृथक्तया नामानि स्मृतानि दृश्यन्ते –

कीर्तिर्वाणी तथा माला शाला हंसी तथैव च।
माया जाया तथा बाला आद्रा भद्रा ततः परम् ॥
प्रेमा रामा तथा ऋद्धिबुद्धिश्चैव विलक्षणैः।
उक्तान्येतानि नामानि विज्ञेयानि यथाक्रमम् ॥ ( वृत्तरत्नाकरस्य प्राज्ञतोषिणीटिकायाम् )

कीर्तिः, वाणी, माला, शाला, हंसी, माया, जाया, बाला, आद्रा, भद्रा, प्रेमा, रामा, ऋद्धिः सिद्धिश्चेति। यद्यपि उपर्युक्तच्छन्दश्शास्त्रनियमानुसारेण कयोरप्येकजातीययोद्र्वयोः छन्दयोः चरणसंयोजनेन उपजातिवृत्तं सञ्जायते। तेन च उपजातीनां बहूनि रूपाणि सम्भवन्ति। तथापि संस्कृतवाङ्मय इन्द्रवज्रोपेन्द्रवज्रयोः, वंशस्थेन्द्रवंशयोः, रथोद्धतास्वागतयोश्चोपजातिः बहुधा प्रयुक्ता दृश्यते। संस्कृतसाहित्ये वंशस्थेन्द्रवंशयोः इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिर्बहुधा द्रष्टुं शक्यते। परं नैपालकेन कविना सुकृतिदत्तपन्तेन रथोद्धतास्वागतयोरप्युपजातिः कार्तवीर्योदयमहाकाव्ये चतुर्षु पद्येषु प्रयुक्ता दृश्यते। (सुकृतिकृतकार्तवीर्योदयमहाकाव्यस्यालङ्कारिकमध्ययनम्, पृ. १०४)

परं प्रतिमानाटके इन्द्रवज्रोपेन्द्रवज्रयोररुपजातिरेव प्रयुक्ता दृश्यते।

तत्र

सीताभवः पातु सुमन्त्रतुष्टः

ऽ ऽ। ऽ ऽ। ।ऽ। ऽ ऽ

सुग्रीवरामः सहलक्ष्मणश्च।

ऽ ऽ। ऽ ऽ। ।ऽ। ऽ ऽ

यो रावणार्यप्रतिमश्च देव्या

ऽ ऽ।ऽ ऽ। ।ऽ।ऽ ऽ

विभीषणात्मा भरतोऽनुसर्गम् ॥ (प्रतिमानाटकम्, १।१)

।ऽ। ऽऽ। ।ऽ। ऽऽ

इन्द्रवज्रायां किल द्वौ तगणावेको जगणो द्वौ च गुरुवर्णौ भवन्तीति सपद्येव दर्शितम्। उपेन्द्रवज्रायाञ्च जगणस्तगणो जगणो द्वौ गुरू च भवन्ति – उपेन्द्रवज्रा जतजास्ततो गौ (वृत्तरत्नाकरम्, ३।३१) इति।

अस्य हि पद्यस्य आद्य चरणत्रयमिन्द्रवज्रालक्षणं घटितमस्ति। अन्त्यं चतुर्थं चरणन्तूपेन्द्रवज्रा घटितमस्ति। इन्द्रवज्राया आद्ये चरणत्रये उपेन्द्रवज्रायाश्चान्तिमे चरणे सङ्घटितो बालनामोपजातिभेदो भवतीति प्रकृतपद्ये इन्द्रवज्रोपेन्द्रवज्रयोरुपजातेर्बालानामा भेदो वर्तते।

एवं प्रतिमानाटकस्य नवसु पद्येषु इन्द्रवज्रोपेन्द्रवज्रयोरुपजाते अष्टानां प्रकाराणां प्रयोगो दृग्गोचरी भवति।

इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिभेदतालिका

| क्र.सं. | भेदः | स्वरूपम् | प्रतिमानाटकस्य पद्यसङ्ख्या |
|---|---|---|---|
| १ | कीर्तिः | आद्यः पाद उपेन्द्रवज्रया शेषं पादत्रयञ्चेन्द्रवज्रया | — |
| २ | वाणी | पद्यस्य द्वितीयपाद उपेन्द्रवज्रया शेषं पादत्रयं चेन्द्रवज्रया | ५/५, |
| ३ | माला | आद्यं पादद्वयमुपेन्द्रवज्रया अन्त्यं पादद्वयं चेन्द्रवज्रया | ५/४ |
| ४ | शाला | तृतीयो पाद उपेन्द्रवज्रया शेषं पादत्रयञ्चेन्द्रवज्रया | — |
| ५ | हंसी | उपेन्द्रवज्रया प्रथमतृतीयपादौ शेषौ च पादौ इन्द्रवज्रया | ४/१३, |
| ६ | माया | प्रथमचतुर्थश्च पाद इन्द्रवज्रया मध्यौ च द्वौ उपेन्द्रवज्रया | ३/१५, ६/१६, |
| ७ | जाया | आद्यं पादत्रयं उपेन्द्रवज्रया चरमश्च पाद इन्द्रवज्रया | ७/३, |
| ८ | बाला | आद्यं पादत्रयम् इन्द्रवज्रया अन्तिमश्चोपेन्द्रवज्रया | १/१, |
| ९ | आद्रा | आद्यान्तौ उपेन्द्रवज्रया मध्यौ चेन्द्रवज्रया | — |
| १० | भद्रा | प्रआद्यः तृतीयश्च पाद इन्द्रवज्रया द्वितीयचतुर्थौ उपेन्द्रवज्रया | ५/३, |
| ११ | प्रेमा | आद्यं पादद्वयम् उपेन्द्रवज्रया शेषम् इन्द्रवज्रया | — |
| १२ | रामा | आद्यं पादद्वयम् इन्द्रवज्रया शेषम् उपेन्द्रवज्रया | ४/९, |
| १३ | ऋद्धिः | द्वितीयं चरणमिन्द्रवज्रया शेषं पादत्रयं चोपेन्द्रवज्रया | — |
| १४ | सिद्धिः | आद्यमिन्द्रवज्रया अन्त्यं पादत्रयं चोपेन्द्रवज्रया | — |

**शालिनी**

एकादशाक्षराणां त्रिष्टुब्जातीयायां शालिन्यां प्रत्येकं चरणेषु मगणस्तगणद्वयं द्वौ च गुरुवर्णौ भवतः। अस्य समवृत्तस्य चतुर्थे ततश्च सप्तमेऽक्षरे विश्रामो भवति। यथा — शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः-।(वृत्तरत्नाकरम्, ३।३५) इत्यस्ति। उदाहरणं यथा –

भग्नः शक्रः कम्पितो वित्तनाथः

ऽ ऽऽ ऽऽ। ऽ ऽ। ऽऽ

कृष्टः सोमो मर्दितः सूर्यपुत्रः।
धिग् भोः स्वर्ग भीतदेवैर्निविष्टं
धन्या भूमिर्वर्तते यत्र सीता ॥ (प्रतिमानाटकम्, ५।१७।)

अत्र मततगणा द्वौ गुरू चतुर्थे ततश्च सप्तमेऽक्षरे यतिर्वतत इति शालिन्याख्यं समवृत्तं वर्तते।

**वंशस्थम्**

द्वादशाक्षरात्मके जगतीजातीये वंशस्थछन्दसि प्रत्येकं चरणेषु क्रमशो जगणः तगणो जगणो रगणश्चेति चत्वारो गणा भवन्ति। तथा– जतौ तु वंशस्थमुदीरितं जरौ।(वृत्तरत्नाकरम्, ३।४७) इत्यस्य लक्षणमस्ति। केवलमेकमेव पद्यं लक्षणसङ्गत्या निरूप्यते –

इयं हि नीलोत्पलदामवर्चसा मृणालशुक्रोज्ज्वलद्रंष्ट्रहासिना।
निशाचरेन्द्रेण निधार्शचारिणा मृगीव सीता परिभूय नीयते ॥ (प्रतिमानाटकम्, ६।१)

अत्र हि प्रत्येकं चरणेषु क्रमशः जतजरा गणा विद्यन्त इति वंशस्थवृत्तमस्ति।

**प्रहर्षिणी**

त्रयोदशाक्षरात्मके अतिजगतीजातीये प्रहर्षिणीनामके समवृत्ते प्रत्येकं चरणेषु मनजराश्चत्वारो गणा एको गुरुश्च भवन्ति। अत्र तृतीये चरणे दशमे चाक्षरे यतिर्भवति।

यथास्य लक्षणम्– म्नौ ज्रौ गस्त्रिदशयति प्रहर्षिणीयम्। (वृत्तरत्नाकरम्, ३।७०) इति।

दिङ्मात्रमत्र प्रस्तूयते –

श्रुत्वा ते, वनगमनं वधूसहायं
सौभ्रात्रव्यवसितलक्ष्मणानुयात्रम्।
उत्थाय क्षितितलरेणुरुषिताङ्गः
कान्तरद्विरद इवोपयाति जीणः ॥ (प्रतिमानाटकम्, १।३०)

अत्र हि मनजरा गणा एको गुरुश्च वर्तन्ते तृतीये ततश्च दशमाक्षरे यतिर्वर्तते इति प्रहर्षिणीवृत्तमस्ति।

**वसन्ततिलका**

चतुर्दशाक्षरात्मिके शक्वरीजातीये वसन्ततिलकाच्छन्दसि प्रत्येकं चरणेषु तगणभगणौ द्वौ जगणौ द्वौ च गुरू भवन्ति। यथास्य लक्षणमस्ति – उक्ता वसन्ततिलका तभजाजगौ गः। एतद् वृत्तं हि सिंहोन्नता, उद्धर्षिणी, मधुमाधवी चेतत्येतैर्नामभिरपि व्यपदिश्यते।

**मालिनी**

पञ्चदशाक्षरात्मके अतिशक्वरीजातीये मालिनीनामके समवृत्ते प्रत्येकं चरणेषु क्रमशः नगणद्वयमेकोम-गणो यगणद्वयञ्च भवन्ति । अत्र अष्टमे ततश्च सप्तमेऽक्षरे यतिर्भवति। ननमयययुतेयं मालिनी भोगिलोकैः। (वृत्तरत्नाकरम् ३।८३।) इत्यस्य लक्षणमस्ति। दिङ्मात्रमत्रमुदाह्रियते –

अधिगतनृपशब्दं धार्यमाणातपत्रं
विकसितकृतमौलिं तीर्थतोयाभिषिक्तम्।

गुरुमधिगतलीलं वन्दमानं जनौघै–
र्नवशशिनमिवार्य पश्यतो मे न तृप्तिः ॥ (प्रतिमाजनटकम्, ७।१२)।

अत्र प्रतिचरणम् ननमययगणाः अष्टमे ततश्च सप्तमेऽक्षरे यतिरस्तीति मालिनीछन्दो वर्तते।

**शिखरिणी**

शिखरिणीछन्दसि य म न स भाः पञ्चगणाः एको लघुरेको गुरुश्च भवन्ति। अत्र षष्ठे ततः एकादशे चाक्षरे यतिर्भवति – रसै रुद्रैश्छिन्ना यमनसभलागशिखरिणी (वृत्तरत्नाकरम् ३।९१)। एकस्मिन्नेव पद्ये लक्षणानुगमः प्रदर्श्यते।

क्व ते ज्येष्ठो रामः प्रियसुत ! सुतः सा क्व दुहिता
विदेहानां भर्तुर्निरतिशयभक्तिर्गुरुजने।
क्व वा सौमित्रिर्मा हतपितृकमासन्नमरणं
किमप्याहुः किं ते सकलजनशोकार्णवकरम् ॥ (प्रतिमानाटकम्, २।१४)।

अत्र हि प्रतिचरणं य म न स भा पञ्चगणाः एकोलघुरेको गुरु षष्ठे, ततैकादशे चाक्षरे यतिरस्तीति शिखरिणीनामकं समवृत्तमस्ति।

**हरिणी**

सप्तदशाक्षरात्मके अत्यष्टिजातीये हरिणीछन्दसि प्रत्येकं चरणेषु नगणः सगणः मगणः रगणः सगणश्चेति पञ्चगणाः एकोलघुरेकश्च गुरुवर्णाः भवन्ति। षष्ठे ततः चतुर्थे ततश्च सप्तमे अक्षरे यतिर्भवति। अस्य लक्षणं यथास्ति– रसयुगहयैन्सौं म्रौ स्लौ गो यदा हरिणी तदा (वृत्तरत्नाकरम्, ३।९४) इति। दिङ्मात्रमुद्धृयते –

भ्रमति सलिलं वृक्षावर्ते सफेनमवस्थितं
।।। ।।ऽ ऽऽऽ ऽ।ऽ।।ऽ।ऽ
तृषितपतिता नैते क्लिष्टं पिवन्ति जलं खगाः।
।।। ।।ऽ ऽऽऽ ऽ।ऽ।।ऽ।ऽ
स्थलमभिपतत्याद्र्राः कीटा बिले जलपूरिते
।।। ।।ऽ ऽऽऽ ऽ।ऽ।।ऽ।ऽ
नववलयिनो वृक्षा मूले जलक्षयरेखया ॥
।।। ।।ऽ ऽऽऽ ऽ।ऽ।।ऽ।ऽ (प्रतिमानाटकम्, ५।२। )

अत्र हि प्रतिचरणं नसमरसाः पञ्चगणाः एकोलघु एको गुरु षष्ठे ततः चतुर्थे ततश्च सप्तमे अक्षरे विश्रामो वर्तते इति हरिणीनामकं समवृत्तं वर्तते ॥

**शार्दूलविक्रीडितम्**

ऊनविंशत्यक्षरात्मके अतिधृतिजातीये शार्दूलविक्रीडितनामके समवृत्ते प्रतिचरणं मसजसतताः षड्गणाः एको गुरुश्च भवन्ति। अत्र हि द्वादशे ततश्च सप्तमे अक्षरे यतिर्भवति। दिङ्मात्रमुदाह्रियते –

नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो
हेषाशून्यमुखाः सवृद्धवनिताबालाश्च पौरा जनाः।
त्यक्ताहारकथाः सुदीनवदनाः क्रन्दन्त उच्चैर्दिशा
रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी ॥ (प्रतिमानाटकम्, २।२)

अत्र हि प्रतिचरणं मसजसतताः षड्गणाः एको गुरुः, द्वादशे ततः सप्तमे चाक्षरे यतिर्वर्तते इति शार्दूलद्ध विक्रीडितं वृत्तमस्ति।

**सुवदना**

विंशत्यक्षरात्मके कृतिजातीये सुवदनानामके समवृत्ते प्रतिचरणं क्रमशः मरभनयभाः षड्गणाः एको लघु एको गुरुश्च भवन्ति। अत्र सप्तमे पुनः सप्तमे ततश्च षष्ठे अक्षरे यतिर्भवति। यथास्य लक्षणं विद्यते– ज्ञेया सप्ताश्वषड्भिर्मरभनययुता, भ्लौ गः सुवदना। (वृत्तरत्नाकरम्, ३।१०१।) इति।

दिङ्मात्रमत्र प्रदर्श्यते –

एते ते दैवतानामसुरपुरवधे गच्छन्त्यभिसरी–
ऽ ऽ ऽ ऽ। ऽ ऽ।।।।।। ऽ ऽ ऽ।। । ऽ
मेते ते शक्रलोके सपुरजनपदा यान्ति स्वसुकृतैः।
एते ते प्राप्नुवन्तः स्वभुजबलजितां कृत्स्नां बसुमती–
मेते ते मृत्युना ये चिरमनवसिताश्छन्दं पृगयता ॥ (प्रतिमानाटकम्, ३।७)

अत्र हि प्रतिपादं मरभनयभा षड्गणाः एको लघुः एको गुरु, सप्तमे ततः पुनः सप्तमे ततश्च षष्ठे अक्षरे यतिर्वतते इति सुवदना वृत्तमस्ति।

**स्रग्धरा**

एकविंशत्यक्षरात्मके प्रकृतिजातीये स्रग्धरानामके समवृत्ते मरभनययया: सप्तगणाः भवन्ति। सप्तसप्तष्वक्षरेषु बारत्रयं यतिर्भवति।

गत्वा पूर्वं स्वसैन्यैरभिसरिसमये खं समानैर्विमानै–
र्विख्यातो यो विमर्दे स स इति बहुशः सासुराणां सुराणाम्।
स श्रीमांस्त्यक्तदेहो दयितमपि विना स्नेहवन्तं भवन्तं
स्वर्गस्थः साम्प्रतं किं रमयति पितृभिः स्वैनरेन्दैरनरेन्द्रः ॥ (प्रतिमानाटकम्, ४।१७)।

अस्मिन् पद्ये प्रतिपादं मरभनययया: सप्तगणाः सप्तमे सप्तमे चाक्षरे यतिर्भवतीति स्रग्धरावृत्तमस्ति।

**पुष्पिताग्रा**

इदं अर्धसमवृत्तमस्ति। अत्र हि प्रथमतृतीयचरणयोः नगणद्वयं रगणः यगणश्चेति चत्वारो गणाः द्वादशाक्षराणि च भवन्ति। समयोः द्वितीयचतुर्थचरणयोः नगणः जगणद्वयं रगणः एको गुरुश्चेति त्रयोदशाक्षराणि भवन्ति। यथा– अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा। (वृत्तरत्नाकरम्, ४।१०) इत्यस्य लक्षणम्। एकमेव पद्यं लक्षणेन संयोज्यते –

नरपतिनिधनं मयानुभूतं नृपतिसुतव्यसनं मयैव दृष्टम्।

।।।।।। ऽ।ऽ।ऽऽ।।।। ऽ।।ऽ।ऽ।ऽऽ

श्रुत इह स च मैथिलीप्रणाशो गुण इव बह्वपराद्धमायुषा मे ॥ (प्रतिमानाटकम्, ६।८)

।। ।। । । ऽ।ऽ।ऽऽ।। । । ऽ।।ऽ।ऽ।ऽ ऽ

## आर्या

आर्या हि मात्रा छन्दो वर्तते। अस्यां हि प्रथमतृतीयपादयोः द्वादशमात्राः, द्वितीये पादे अष्टादश, चतुर्थे च पञ्चदशमात्रा भवन्ति।

यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि

अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ (श्रुतबोधः,४ )

सूर्य इव गतो रामः

ऽ। ।। । ऽ ऽ ऽ = १२

सूर्यं दिवस इव लक्ष्मणोऽनुगतः।

ऽ ऽ ।।। ।। ऽ । ऽ ।। ऽ = १८

सूर्यदिवसावसाने

ऽ। ।। ऽ। ऽ ऽ = १२

छायेव न दृश्यते सीता ॥

ऽ ऽ।। ऽ। ऽ ऽ ऽ =१५ (प्रतिमानाटकम्, २।७)

गुरु द्विमात्रिकः लघुश्चैकमात्रिको भवतीति प्रकृतपद्यस्यास्य प्रथमे चरणे द्वादशः, द्वितीये चरणे अष्टादशः, तृतीये पुनः द्वादशः, चतुर्थे च चरणे पञ्चदशमात्राः सन्तीति आर्या वृत्तं वर्तते।

## छन्दःशास्त्रीय विनियोगानुगमः

यद्यपि प्रस्तारविधिना छन्दसां भेदाः असङ्ख्याताः सम्भवन्ति तथापि छन्दशास्त्रिभिः कविभिः प्रयुक्तानामेव छन्दसां विवेचनं विहितं दृश्यते। तत्राप्याचार्येण क्षेमेन्द्रेण प्रसिद्धेषु छन्दसु केवलं अतिप्रख्यातानां द्वादशानां छन्दसां केषाञ्चित् विषयविशेषे केषाञ्चिच्च रसभावविशेषे विनियोगो विहितो दृश्यते। तेन हि

| | | | |
|---|---|---|---|
| १) अनुष्टुभ् | २) उपजातिः | ३) रथोद्धता | ४) वंशस्थम् |
| ५) वसन्ततिलका | ६) मालिनी | ७) शिखरिणी | ८) हरिणी |
| ९) पृथ्वी | १०) मन्दाक्रान्ता | ११) शार्दूलविक्रीडितम् | १२) स्रग्धरा |

इत्येतानि हि द्वादशछन्दांसि क्षेमेन्द्रेण विषयविशेषेषु रसभावविशेषेषु वा विनियुक्तानि दृश्यन्ते। इतोऽतिरिक्तं तेन दोधकतोटकनर्कुटकप्रभृतीनां छन्दसां स्फुटककवितासु विनियोगः कृतोऽस्ति। एतेषां विनियोगस्य स्थितिः प्रतिमानाटकछन्दसां विश्लेषणे निरूपयिष्यते।

यद्यप्याचार्येण क्षेमेन्द्रेण केषाञ्चिच्छन्दसां रसविशेषेषु विषयविशेषेषु च विनियोगो व्यधायि तथापि

तेनास्य नियमस्यापरिहार्यता नास्तीति यस्य कवेः यस्मिन् वृत्ते विशेषाभिरुचिर्यत्राधिक्येनाभ्यासो यत्र वा प्रागल्भ्यं भवति तेनैव छन्दसा स्वसन्दर्भप्रकाशनं विधेयमिति कथितम् –

वृत्ते यस्य भवेद् यस्मिन् अभ्यासेन प्रगल्भता।
स तेनैव विशेषेण स्वसन्दर्भं प्रकाशयेत्। (सुवृततिलकम्, ३।२७।)

प्रायेण परवर्ति संस्कृतसाहित्यं पुराणेतिहासादिषु प्रथितस्य कथावस्तुनो वर्णनशैल्याः सांस्कृतिक-धार्मिक व्यावहारिकप्रवृत्तेश्च पुरातनीं छायामनुसृत्यैव प्रवृत्तं दृश्यते। अथ भासकृतं प्रतिमानाटकमपि वाल्मीकिप्रणीतस्य रामायणस्य कथावस्तुगतां सांस्कृतिकीं धार्मिकीं व्यावहारिकीं च पुराणीं प्रवृत्तिमधिकृत्य प्रवृत्तमस्तीति प्रतिमानाटके प्रयुक्तानि अनुष्टुभः पद्यानि क्षेमेन्द्रस्य विनियोगानुसारेण उत्कृष्टानि विद्यन्ते। किञ्च सर्वाण्यपि पद्यानि नाटकस्यापि कृत्याकृत्योपदेशपरततया उपदेशपराण्येव सन्ति –

इदानीं भूमिपालेन कृतकृत्याः कृताः प्रजाः
रामाभिधानं मेदिन्यां शशाङ्कमभिषिञ्चता ॥ (प्रतिमानाटकम्, १।४।)।

राज्ञां न्यायोचितकार्यसम्पादनेन लोककृतार्था जायन्ते तेषु प्रसादस्य सञ्चारः सम्पद्यते इति राजभिः न्यायोचितं जनानुमोद्येव कार्यं करणीयमित्याद्युपदेश सहजतयैव पाठकान् मोहयति। एवमेव अनुष्टुभा निर्वेदस्य प्रस्तुतिरपि उत्कर्षे दृग्गोचरी भवति –

अयं हि दुःखमन्त्यन्तमसह्यं ज्वलनोपमम्।
नैव सोढुं न संहर्तुं शक्नोमि मुषितेन्द्रियः ॥ (प्रतिमानाटकम्, २।९।)।

अत्र हि दशरथनिष्ठा रामविरहजनिताचित्तवृत्तिर् दैन्यचिन्तादिपुष्टा निर्वेदरूपतया चित्तमावर्जयति। एवं चानुष्टुभः प्रतिमानाटकगत सर्वोऽपि सन्दर्भः पद्यगतमुत्कर्षं प्रस्तौति।

पुराणप्रतिविम्बेषु प्रसन्नोपायवत्र्मसु।
उपदेशप्रधानेषु कुर्यात्सर्वेष्वनुष्टुभम् ॥ (सुवृत्ततिलकम्, ३।९)।

पुराणानाम् प्रतिबिम्बत्वेन प्रणीतेषु कृत्याकृत्योपदेशकेषु, सुस्पष्टकर्तव्यपथनिर्देशकेषु च ग्रन्थेषु अनुष्टुभ्छन्दसः प्रयोगः स्पृहणीयो भवति।

महाकाव्यादिनां प्रबन्धानाम् प्रारम्भे कथायाः विस्तारे, सङ्ग्रहे, शान्तेरुपदेशार्थं प्रयुक्तानां छन्दसामन्त्ये च आचार्येण क्षेमेन्द्रेण अनुष्टुप्छन्दसः विनियोगो विहितोऽस्ति।

आरम्भे सर्गबन्धस्य कथाविस्तरसङ्ग्रहे।
समोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् ॥ (सुवृत्ततिलकम्, ३।१६)।

गतो रामः, प्रियं तेऽस्तु, त्यक्तोऽहमपि जीवितैः।
क्षिप्रमानीयतां पुत्रः, पापं सफलमस्त्विति ॥ (प्रतिमानाटकम्, २।२०।)

अस्यां हि दशरथोक्तौ रामवनगमनस्य दशरथदेहत्यागस्य च सूचना रूपा घटना कथाविस्तारपुरस्सरम् अनुष्टुभः प्रयोगस्य स्पृहणीयतां सम्पादयति।

शृङ्गाररसस्य आश्रयालम्बनभूतानां विषयालम्बनभूतानाञ्च नायिकानामुदात्तस्य सौन्दर्यस्य वर्णने उपजातिछन्दः प्रशस्यते। एवमेव वसन्तादिनां षाण्णाम् ऋतूनां तदङ्गभूतानां प्रकृतीनाञ्च वर्णने उपजाति-छन्दसः प्रयोग आधिक्येन उपयुक्तो मन्यते।

श्रृंगारालम्बनोदारनायिकारूपवर्णनम्।
वसन्तादि तदंगञ्च सच्छायमुपजातिभिः ॥ (सुवृत्ततिलकम्, ३।१७)

अस्यां रामोक्तौ रत्याश्रयभूतायाः सीतायाः कोमलतायाः उपजातिछन्दसा वर्णनं चित्तावर्जकमस्ति।

सन्धि, विग्रह, यान, आसन, द्वैधीभाव, संश्रयरूपाणाम् (सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणाः (अमरकोषः) षण्णां गुणानां योगेन प्रशस्तायाः नीतेः वर्णने वंशस्थछन्दसः प्रयोगः आधिक्येन मनोरमो मन्यते।

षाड्गुण्यप्रगुणा नीतिर्वंशस्थेन विराजते ॥ (सुवृत्ततिलकम्, ३।१८।

पितुर्नियोगादादहमागतो वनं
न वत्स ! दर्पान्न भयान्न विभ्रमात्।
कुलं च नः सत्यधनं ब्रवीमि ते
कथं भवान् नीचपथे प्रवर्तते ॥ (प्रतिमानाटकम्, ४।२०)

अत्र हि वंशस्थेन नीतेर्वर्णनं चित्तमावर्जयति।

वीररसस्य रौद्ररसस्य च साङ्कर्ये वसन्ततिलकानामकं वृत्तं सौन्दर्ययोगाय सञ्जायते। यथा

वसन्ततिलकं भाति सङ्करे वीररौद्रयोः। (सुवृत्ततिलकम्, ३।१९)।

महाकाव्यानां गद्यकाव्यानां खण्डकाव्यानां वा अन्त्ये मालिनीछन्दसः प्रयोगो गीतान्ते तालस्य दूतगति-रिव गुणावहो मन्यते।

कुर्यात्सर्गस्य पर्यन्ते मालिनीं द्रुततालवत् ॥ (सुवृत्ततिलकम्, ३।१९)

कस्यापि विषयस्य सिम्नो निर्धारणे शिखरिणीछन्दः प्रशस्यते।

उपपन्नपरिच्छेदकाले शिखरिणी मता। (सुवृत्ततिलकम्, ३।२०)।

द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया
नदीवोद्वृत्ताम्बुर्निपतति मही नेमिविवरे
अरव्यक्तिर्नष्टा स्थितमिव जवाश्चक्रवलयं
रजश्चाश्वोद्धूतं पतति पुरतो नानुपतति ॥ (प्रतिमानाटकम्, ३।२)।

अत्र शिखरिणीछन्दसा रामं प्रत्यावर्तयितुं वनं गच्छतो भरतस्य रथवेगसीमा प्रस्तूयमाना पाठकानां चित्तमावर्जयति। इतोऽतिरिक्तं क्षेमेन्द्रस्य छन्दसां विषयादिविनियोगे रथोद्धता–वसन्ततिलका–मालिनी–हरिणी–पृथ्वी–शार्दुलविक्रीडित–स्रग्धराछन्दसामपि विषयविशेषेषु रसविशेषेषु वा विनियोगो विहितो दृश्यते। तथापि प्रतिमानाटके तस्य सङ्गतिर्न दृश्यते। यद्यपि प्रसिद्धैः पञ्चदशभिः छन्दोभिः प्रतिमानाटक-स्य पद्यानां निर्मितौ क्वापि अस्वाभाविकता असामञ्जस्यम् अश्राव्यं वा न प्रतिभाति। तथापि तत्र अनुष्टुभः

एव विनियोगानुसारेण विषयानुसरणपुरस्सरं सङ्गतिः पूर्णतया द्रष्टुं शक्यते। भासस्य समयः विक्रमस्य पञ्चशतवर्षाणि पूर्वं मन्यते। क्षेमेन्द्रस्य समयनिर्धारणं विद्वद्भिः विक्रमस्य एकादशशताब्द्यां विहितम्। अतः भासकालिदासादीनां प्राचीनानां महाकविनां लक्ष्यग्रन्थान् विलोक्यैव परवर्तिना आचार्येण क्षेमेन्द्रेण छन्दसां विषयविशेषे रसविशेषे वा विनियोगो व्यधायि। सामान्यतया द्वित्राणां पञ्चषानां वा छन्दसां विनियोगस्य सङ्गतौ सत्यामपि सर्वाण्यपि छन्दांसि क्षेमेन्द्रकृतविनियोगेन न सङ्गच्छन्ति।

यद्यपि छन्दांसि असङ्ख्यातानि विद्यन्ते तथापि आचार्येण क्षेमेन्द्रेण द्वादशानामेव वृत्तानां विषयविषेशेषु रसविशेषेषु विनियोगो विहितोस्ति। आचार्यस्य क्षेमेन्द्रस्य अनुसारेण अन्यानि छन्दांसि केवलं छन्दसां भेद-विभागमेव विदधतीति तेषां विषयविशेषेषु रसविशेषेषु च प्रयोगः विशेषाय सौन्दर्याय न कल्पते।

शेषाणामप्यनुक्तानां वृत्तानां विषयं विना।
वैचित्र्यमात्रपात्राणां विनियोगो न दर्शितः ॥ .(सुवृत्ततिलकम्, ३।२४)

## निष्कर्षः

प्रतिमानाटके श्लोकवृत्तनाम्ना पद्यनाम्ना ख्यातस्य अनुष्टुभः सर्वाधिकं सप्तसप्ततौ पद्येषु प्रयोगो विद्यते। तदनन्तरं वसन्ततिलकावृत्तस्य स्थानं विद्यते। अनेन छन्दसा प्रतिमायां द्वाविंशतिः पद्यानि निबद्धानि सन्ति। तदनन्तरमुपजातिवृत्तस्य नवसु मालिनीवृत्तस्य दशसु पद्येषु, शार्दूलविक्रीडितस्य अष्टसु, शिखरिण्या पञ्चसु, वंशस्थस्य हरिण्या च चतुर्षु चतुर्षु पद्येषु, इन्द्रवज्रायाः प्रहर्षिण्या च त्रीणि त्रीणि पद्यानि सन्ति। एवमेव सुवदनायां द्वे, स्रग्धरायाम् शालिन्यां चैकैकं पद्यं वर्तते। एवं वर्णसमवृत्तेषु पुष्पिताग्रानामकस्य अर्ध-समवृत्तस्य त्रीणि, आर्यानामकस्य मात्राछन्दसः च द्वे पद्ये वर्तेते। आचार्यस्य क्षेमेन्द्रस्य विषयदृशा रसदृशा च विहितस्य विनियोगस्य अनुसारेण अनुष्टुभः प्रयोगः आधिक्येन गुणावहो वर्तते। उपजातिछन्दासो ऽपि शृंगाररसे प्रयोगः छन्दशास्त्रानुसारी चित्तावर्जकश्च वर्तते। तथैव वंशस्थस्य शिखरिण्याश्च प्रयोगोऽपि क्षे-मेन्द्रकृत विनियोगस्य समीचीनोनुगमोऽस्ति। एवं चतुर्णामेव छन्दसां विषयवस्तुदृशा रसदृशा च विहितस्य विनियोगस्य समन्वयः चारुतरो वर्तते। यत्र छन्दशास्त्रानुसारेण विषयस्य रसस्य वा प्रस्तुतिर्नास्ति तत्रापि छन्दसां प्रयोगः चारुतरः श्रव्यः चित्तावर्जकश्च वर्तते।

## सन्दर्भग्रन्थाः

कालिदासः (२०२०). *श्रुतबोधः.* वाराणसी : चौखम्बा संस्कृत विद्याभवन।

कालिदासः (सन् १९४८). *रघुवंशम्.* निर्णयसागर मुद्रणालय।

केदारभट्टः. (सन् १९७२). *वृत्तरत्नाकर.* वाराणसी : मोतीलाल वनारसीदास।

क्षेमेन्द्रः. (२०१०). *सुवृत्ततिलकम्.* वाराणसी : चौखम्बा विद्याभवन।

पाणिनिमुनि. (सन् १९५०). *अष्टाध्यायी.* वाराणसी : चौखम्बा संस्कृत सिरीज अफिस।

भास. (सन् २०१६). *प्रतिमानाटकम्.* पुनर्मुद्रण. दिल्ली, मुम्बई, चेन्नई : मोतीलाल वनारसीदास।

शास्त्री, मधुसूदन. (सम्पा. सन् १९७१). *नाट्यशास्त्रम्* (अभिनवभारती). वाराणसी : काशी हिन्दु विश्वः विद्यालय।

यास्काचार्यः. (सन् १९८९). *निरुक्तम्.* दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

शर्मा, गिरीधर, शर्मा, परमेश्वरानन्द. (सम्पा. सन् १९७६). *सिद्धान्तकौमुदी.* तृतीयोभाग. दिल्ली, पटना, वाराणसी : मोतीलाल वनारसीदास।

शर्मा, रत्नावली. (२०७४). *सुकृतिकृतकार्तवीर्योदयमहाकाव्यस्यालङ्कारिकमध्ययनम्.* विद्यावारिधि शोधप्रबन्धः. नेपालसंस्कृतविश्वविद्यालयः।